जात” इति रघुः । “रथ्या च साशङ्कमनुप्रयात” इति कुमा० अनुष्ठाने, “शैलाधिपत्यं स्वयमन्वतिष्ठदिति” कुमा० सादृश्ये, “अनुगर्जितसन्दिग्धा” इति कुमा० । अनुगर्जितं गर्जनसदृशं प्रतिरूपगर्जितमित्यर्थः । अनुगताद्यर्थे नित्यसमासः । तथैव सोऽभूदन्वर्थो “राजा प्रकृतिरञ्जनादिति” रघुः । तत्र अन्वर्थः अनुगतोऽर्थो यस्येति प्रा०ब०वा अनित्यसमास उत्तरपदलोपो वा इति तत्र अनुगतार्थोऽपीति भेदः । एवमेव अनूप इत्यादावपि । उपासने च “अन्वासितमरुन्धत्येति” रघुः “पश्चादुपवेशनपूर्व्वकसेवायां धातोर्लक्षणायास्तद्द्योतकः । एवम् एतद्योगे वसतेः आधारस्य कर्म्मता अनुवसति ग्रामं देवदत्तः “मथुरामनूष्येति” मु०बो० क्रियासमभिव्याहृतस्यानुशब्दस्य तत्तत्क्रियासदृशतत्तत्क्रियायां लक्षणाद्योतकत्वं तत्र आद्यक्रियाश्रयस्य कर्मत्वम् यथा मातरमनुरोदितीत्यादौ मातृरोदनसदृशरोदनस्य बोधनेन प्रथमरोदनाश्रयस्य मातुः कर्मत्वमेवमन्यत्र । कर्मणि तिङाद्युक्ते तु प्रथमा ।

**अनुक** त्रि० अनुकामयते अनु+कामतर्थ्यर्थे कन् । कामुके “अनुकाभिकाभीकाः कमयितेति” पा० “वाचमनुकामात्मनोऽकुरुतेति” कौ० ब्रा० ।

**अनुकम्** अव्य० अनुकामयते अनु-कम-क्विप् । वितर्के । चादेराकृतिगणत्वात् अस्य चादिगणे पाठः इति ग्रौ०मनो० ।

**अनुकम्पक** त्रि० अनुकम्पते दयते अनु—कम्प—ण्वुल् । दयाकारके । “सर्व्वभूतानुकम्पक” इति मनुः ।

**अनुकम्पन** त्रि० अनु+कम्प—युच् । दयाशीले । “सर्वभूतानुकम्पन” इति रामा० । भावे ल्युट् । दयायां न० ।

**अनुकम्पा** स्त्री अनु+कम्प-अङ् । दयायाम्, दयया हि दुःखहेतुकान्यकम्पं दृष्ट्वा तत्सदृशकम्पकरणात् दयायास्तथात्वम् अतएवानुकम्पधातोरनुरोदनवत् सकर्म्मकत्वम् । दया च परदुःखप्रहरणेच्छा अनुपूर्व्वककम्पतेस्तदर्थपरत्वमित्येके धात्वर्थगृहीतकर्म्मकत्वेन तत्राकर्म्मकत्वमिति भेदः । “तेषामेवानुकम्पार्थं प्रदेयं प्रीतिपूर्व्वकमिति” स्मृतिः । “भूतानुकम्पा तव चेदियं गौरिति” रघुः । किञ्चिच्चलने च ।

**अनुकम्प्य** त्रि० अनुकम्पमर्हति अनुकम्प+यत् । तरस्विनि वेगवति । अनुकम्प्यते अर्हार्थे यत् । दयार्हे त्रि० । “दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्यामिति” कुमा० ।

**अनुकरण** न० सादृश्ये अनु+कृ—ल्युट् । सदृशक्रियादिकरणे । तच्च गुणक्रियावयवादिभिः सदृशीकरणम् । अनुक्रियतेऽनेनेति करणे ल्युट् । सदृशीकरणसाधने । यथा पटत्पा-प्रभृतिशब्दाः अव्यक्तशब्दानुकरणानि । “अव्यक्तस्यानुकरणस्यात इतौ” इति पा० ।

**अनुकर्ष(ण)** पु० अनुकृष्यते स्वसंबद्धेन चक्रेण अनु+कृष—घञ् । रथाधःस्थिते चक्रोपरि बद्धे काष्ठे । कर्त्तरि ल्यु । नान्तोऽप्यत्रार्थे । भावे ल्युट् । पूर्ववाक्योपात्तपदादेरुत्तरत्रान्वयार्थमाकर्षणे, आकर्षणमात्रे च न० ।

**अनुकल्प** पु० कल्प्यते विधीयते इति कृप—णिच्—अच् कल्पो विहितः हीनः कल्पो मुख्यकल्पादधमः प्रा०स० । गौणकल्पे, प्रतिनिधौ । “एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः । अनुकल्पस्त्वयं ज्ञेय” इति । “प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते” इति च मनुः “समर्थः प्रथमे कल्पे योऽनुकल्पे प्रवर्त्तते” इति स्मृतिः । “भार्य्याः कार्य्याः सजातीयाः सर्वेषां श्रेयसः स्युरितिमुख्यः कल्पस्ततोऽनुकल्पस्तु चतस्रो ब्राह्मणस्येत्यादि” पैठीनसि स्मृतिः । अनुकल्पश्च मुख्यद्रव्याद्यभावे तत्सदृशद्रव्यान्तरादि प्रतिनिधिरूपम् । यथा “यवाद्यभावे गोधूमाः मध्वाद्यभावे गुडादयः । एवं उपवासासामर्थ्ये नक्तं “हविष्यान्नादि स्मृतिषूक्तं वेदितव्यम् । अनुगतं कल्पं वेदाङ्गभेदम् अत्या०स० । कल्पानुगते ग्रन्थे अनुकल्पप्रतिपादकग्रन्थे च तद्वेत्तरि उक्थादि०ठक् । आनुकल्पिकः अनुकल्पग्रन्थवेत्तरि त्रि० ।

**अनुकाम** पु० अनुरूपः कामः प्रा०स० । योग्याभिलाषे । सदृशं कामस्य सादृश्यार्थे काममनतिक्रम्य याथार्थ्ये वा अव्ययी० । कामसादृश्ये यथाकामे च अव्य० । अनुकामं तर्पयेथामिति ऋ० १,१७,२, “अनुकामं परा दा इति” ऋ०८,४८,८, “अनुकामं यथाकाममिति” भा० । अनुकामयते अनु+काम—अच् । अतिकामुके त्रि० ।

**अनुकामीन** त्रि० कामस्य अभिलाषस्य सदृशमनुकामं सादृश्येऽव्ययी० ततः गच्छतीत्यर्थे ख । यथेष्टगमनशीले । “अनुकामीनतां त्यजेति” भट्टिः । [विवरणमनुकरणशब्दे दृश्यम्

**अनुकार** पु० अनु—कृ—घञ् । गुणक्रियादिभिः सदृशीकरणे ।

**अनुकारिन्** त्रि० अनुकरोति अनु+कृ—णिनि स्त्रियां ङीप् । गुणक्रियादिभिः सदृशीकारके । “अनुकारिणि पूर्व्वेषां युक्तरूपमिदं तव” इति रामा० ।

**अनुकार्य्य** अनुक्रियतेऽसौ अनु+कृ—कर्मणि अर्हार्थे वा ण्यत् । अनुकरणीये सदृशीकरणार्हे पश्चात्करणीये च । “यः पश्चात् पूर्व्वकार्य्याणि कुर्य्यादैश्वर्य्यमोहितः पूर्व्वं चैवानुकार्य्याणीति” रामा० ।

**अनुकाल** अव्य० कालस्य योग्यम् याथार्थ्ये अव्ययी० । काल-